लोकप्रियसाहित्यग्रन्थमाला - १२

हरियोगिकृतम्

# शाब्दिकाभरणम्

सम्पादकः
देवानन्द शुक्ल

राष्ट्रियसंस्कृतसंस्थानम्
मानितविश्वविद्यालयः
नवदेहली

# प्रास्ताविकम्

॥ वन्दे महापुरुष ते चरणारविन्दम् ॥

विश्वस्य प्राचीनतमः ग्रन्थः ऋग्वेदः। वैदिके वाङ्मये ऋग्वेदः अन्यतमः। वैदिकवाङ्मयं संहिता–ब्राह्मण–आरण्यक–उपनिषदां समष्टिः। वेदाध्ययने उपकारकाणि षडङ्गानि शिक्षा–कल्प–निरुक्त–व्याकरण–छन्दोज्यौतिषाणि प्रथितानि। एतेषु षट्सु अङ्गेषु व्याकरणं प्रधानम् अङ्गं परिगण्यते।

संस्कृतवाङ्मयपरम्परायां व्याकरणशास्त्रपरम्परापि अतीव प्राचीना वर्तते। वैदिकवाङ्मयमिव व्याकरणमपि अतीव पुरातनं विद्यते। वैदिकसाहित्ये ब्राह्मणसंहितारण्यकोपनिषत्सु अपि व्याकरणप्रतिपाद्यविषयाः क्वचित् क्वचित् दृश्यन्ते। विस्तरेण व्याकरणविषयाः तत्सम्बद्धविषयाश्च शिक्षाग्रन्थेषु प्रातिशाख्येषु निरुक्तेषु व्याकरणेषु च समुपबृंहिताः सन्ति। पाणिनेः पूर्ववर्तिनः नैके वैयाकरणाः पाणिनेः प्राक् विविधं व्याकरणं तेनुः। पाणिनिः स्वयमेव दशानां पूर्ववर्तिनां वैयाकरणानां नामानि उल्लिलेख। एते दश वैयाकरणाः आपिशलिः[1] काश्यपः[2] गार्ग्यः[3] गालवः[4] चाक्रवर्मणः[5]

1 वा सुप्यापिशलेः (पा० अ० ६/१/९२)

2 तृषिमृषिकृषेः काश्यपस्य (पा० अ० १/२/२५)

3 ओतो गार्ग्यस्य (पा० अ० ८/३/२०)

4 अङ्गार्ग्यगालवयोः (पा० अ० ७/३/९९)

5 ई३ चाक्रवर्मणस्य (पा० अ० ६/१/१३०)

# प्रास्ताविकम्

॥ वन्दे महापुरुष ते चरणारविन्दम् ॥

विश्वस्य प्राचीनतमः ग्रन्थः ऋग्वेदः। वैदिके वाङ्मये ऋग्वेदः अन्यतमः। वैदिकवाङ्मयं संहिता–ब्राह्मण–आरण्यक–उपनिषदां समष्टिः। वेदाध्ययने उपकारकाणि षडङ्गानि शिक्षा–कल्प–निरुक्त–व्याकरण–छन्दोज्यौतिषाणि प्रथितानि। एतेषु षट्सु अङ्गेषु व्याकरणं प्रधानम् अङ्गं परिगण्यते।

संस्कृतवाङ्मयपरम्परायां व्याकरणशास्त्रपरम्परापि अतीव प्राचीना वर्तते। वैदिकवाङ्मयमिव व्याकरणमपि अतीव पुरातनं विद्यते। वैदिकसाहित्ये ब्राह्मणसंहितारण्यकोपनिषत्सु अपि व्याकरणप्रतिपाद्यविषयाः क्वचित् क्वचित् दृश्यन्ते। विस्तरेण व्याकरणविषयाः तत्सम्बद्धविषयाश्च शिक्षाग्रन्थेषु प्रातिशाख्येषु निरुक्तेषु व्याकरणेषु च समुपबृंहिताः सन्ति। पाणिनेः पूर्ववर्तिनः नैके वैयाकरणाः पाणिनेः प्राक् विविधं व्याकरणं तेनुः। पाणिनिः स्वयमेव दशानां पूर्ववर्तिनां वैयाकरणानां नामानि उल्लिलेख। एते दश वैयाकरणाः आपिशलिः[1] काश्यपः[2] गार्ग्यः[3] गालवः[4] चाक्रवर्मणः[5]

1 वा सुप्यापिशलेः (पा० अ० ६/१/९२)

2 तृषिमृषिकृषेः काश्यपस्य (पा० अ० १/२/२५)

3 ओतो गार्ग्यस्य (पा० अ० ८/३/२०)

4 अङ्गार्ग्यगालवयोः (पा० अ० ७/३/९९)

5 ई३ चाक्रवर्मणस्य (पा० अ० ६/१/१३०)

इत्यात्मनेपदम् एदिधिषते यङ् नास्त्यहलादित्वात्।

**स्पर्ध सङ्घर्षे।।** स्पर्धते। अस्पर्धत। अस्पर्धताम्। स्पर्धेत। आशिषि स्पर्धिषीष्ट। [1]'शर्पूर्वाः खयः' (पा०सू० ७/४/६१) अभ्यासे खयः शिष्यन्ते इतरे हलो लुप्यन्ते पस्पर्धे अस्पर्धत। पस्पर्धे। अंस्पर्धिष्ट णौ चङि 'सन्वल्लघुनि चङ्परेऽनग्लोपे' (पा०सू० ७/४/९३) लघुनि चङ्परे णौ सति सनीव कार्यं[2] लघुनो धात्वक्षरस्य परत्वाभावेन सन्वद्भावो सन्यत इत्यभ्यास्य इत्वं न भवति। 'दीर्घो लघोः' (पा०सू०७/४/९४) लघोरभ्यासस्य दीर्घो भवति। 'सन्वल्लघुनि चङ्परेऽनग्लोपे' (पा०सू० ७/४/९३) इति लघुनोपधात्वक्षरस्य परत्वाभावा[3]देव दीर्घो न भवति। अपस्पर्धत। लृलुटोः स्पर्धिष्यते। अस्पर्धिष्यत। स्पर्धिता।[4] सनि पिस्पर्धिषति। यङि 'दीर्घोऽकितः' (पा०सू० ७/४/८३) अकितोऽभ्यासस्य दीर्घो भवति। यङि परतः अकिद्[5]ग्रहणेन 'नुगतोऽनुनासिकान्तस्य' (पा०सू० ७/४/८५) इति यत्र नुक् यंयम्यते इत्यादौ तत्र न भवति। ननु दीर्घस्य नुगपवादो भविष्यतीति निरर्थकमकि ग्रहणम् एवं तर्हि एतदेव ज्ञापयति 'अभ्यासविकारेष्वपवादो नोत्सर्गविधीन्[6] बाधते' इति पास्पर्ध्यते।

**गाधृ प्रतिष्ठालिप्सयोः ग्रन्थे च[7]।।** ऋकारो 'नाग्लोपिशा-

---

1 शर्पूर्वाः खयः अभ्यासे खयः शिष्यन्ते इतरे हलो लुप्यन्ते पस्पर्धे अस्पर्धत। X (क) (ग)

2 लघुनि चङ्परे णौ सति सनीव कार्यं X (क) (ग)

3 भावेन सन्वद्भावो सन्यत इत्यभ्यास्य इयं न भवति। दीर्घो लघोः। लघोरभ्यासस्य दीर्घ भवति सन्वलघुनिव इपते नग्लोप इति लघुनोपधात्वक्षरस्य परत्वाभावा X (ख)

4 अस्पर्धिष्यत। स्पर्धिता। X (क) (ग)

5 अकि (क) (ग)

6 कारान् (ख)

7 ग्रन्थे च X (ख)

योऽनूचानः स नो महान्।

राष्ट्रियसंस्कृतसंस्थानम्


राष्ट्रियसंस्कृतसंस्थानम्

मानितविश्वविद्यालयः

नवदेहली